दि कफस्थानात् पूर्व्यं चात्र कफस्थानोद्भूततया प्रथमं कफसंबंधात् सन्निपातज्वरइ-
याआदौ कफप्रबलत्वमेवाह पित्तमारुतपर्यंते इति अनेनचार्थात्कफादिवत्तं भयति
समपीतेन तेनैवेति यज्जातीयेन समेन मद्यात्यये जनितस्तज्जातीयेनैव शाम्यति ॥ यथा
विषं मौक्तं दुष्टितेन विजातीयेन शाम्यति । तथा मद्यमपि विजातीयेन मद्येन शाम्यति
येके ॥ किंतु तेनैव सत्र मद्यजातिपनाम् ऋषभो इति न्यायात् तेनावश्यं तज्जातीयमेव म-
द्यं दियतां यतो नंतरं वक्ष्यति ॥ यच्च यस्मै हितं भवेदिति । तथा मद्यात् सत्त्ववर्णपै

ष्ठिकं वातश्लेष्मात्यये इत्यनेन येन केनचिन्मद्ये भूते वातमदात्यये पैष्टिकमुक्तं तथा स
त्राक्षिकं चेत्यादि विशेषविधानं बहुकनिष्पत्तितेन तज्जातीयेन मद्येन मदात्यये देयं
अन्नेन रसस्योत्कुंदो अन्नरसोत्कुंदः केचिदम्लेद इति पठंति ॥ ननु क्षारमाद्युपयि
सर्थं यदाम्लमद्यदाने तदाकिमिति अन्यदम्लेनेदीयत इत्याह । श्रेष्ठमित्यादि । उ
पर्युपरीति ॥ उपविष्टादप्युपविश ॥ अयथमोदद्यादिति निवर्त्तते दाहादयः ॥
केचिज्ज्वरादय इति पठंति । तथा ज्वरप्रधानांतदाहादयः । इत्यस्य योनिः । जवदं
शोयमुपसुद्धमद्यं पीयते दक्षः कुक्कुटः वेशवारः खाविंकः सचोक्तलक्षणोऽसे
दूतद्रूपवर्त्तिः वसा काकायूपनिकः रसप्रलेपमिति । रसप्रलेपं रपत्रयानिरुक्ति
रसप्रलेहमिति यावत् ॥ अणुनूपं केति अणुवीलिपैः घनेति बहलेर्लेपैः

संबोधोक्षामुखप्लवैरिति संबोधजनितोष्मपामुखकारवैश्च अन्येष्यादिना । पैत्तिक
विधिमाह । शेन्यमोत्तनापयिकं केचित्कर्म्मेतंगमाहुः माद्वीकमिति मद्वीकानसं
तीनो वर्त्तुलकंठाय ॥ रोगाद्विमुच्यत इति । क्षरतपित्तमदात्ययात् । मुच्यतेक्रममिति
वमनांतनसंग्रदोषशेषात्क्रको ह्यपलेपकोज्ञेयः गुडूचीयादौ रसमिति क्वाथं तिति
नी प्रतिभोजनं पश्चाज्जीर्णे भोजनं यस्मिन् रसे तत्तितिनि प्रतिभोजनं अनुनेषां व
दापयेदिति भोजनसमये तृषालक्षीरस्य दापयेत् ॥ अनुपानं दापयेदिति यावत्
एतदनुपानस्य मात्रामाह ॥ अनुतृषस्यामिति मुहुर्मुहुर्दीयमानानुपानस्य । नोद्भूनो
द्रस्यत इति ॥ एतेन च तृषायां मनो दैन्यमात्र हेतत्पन्न मद्ये भवति । तदनुतर्षसंतेभ
वति ननु मदपर्य्यंतमद्यं देयमित्यर्थः तृष्णाघ्नमिति चीनकषायरूपं न सच्चुक्ति तौ

गेनीत्युक्तिकासु चांगेनी। बदर्यादौ बदर्यादिपत्रापि मथितं। १२ हृद्येषु पेतो मात्यच्छ
निष्ठकौ निंबः॥ पूर्निलाउ ह्लेखनेयादि। नाकदेमदात्ययचिकित्सितं त्र्यते॥ सलिलमि
यादौ षडंगविधिना जलसाधनं॥ मध्वितिं॥ मध्वं प्रवरेति माधवं॥ व्योषप्रधानो यूषो
व्योषयूषनीरसवर्त्तिसमतानिष्ठवर्त्तितं पुनः क्षुब्धक्ष्व्यैव्यजनमित्यर्थः॥ रणुयादि
सास्तुयात॥ आर्द्रकपेशिका आर्द्रकदीर्घखंडानि किंवा आर्द्रकयाषिनमिति पाठः॥
सौवर्च्चलमित्यादौ वंगेलामाखिनां प्रत्येकं एकभागादिके तत्र एकभागपूर्वके द्रव्यभा
गसमश्वेतामिति मृद्विकां चिरगपाश्वेतावद्राक्षाकक्ष्मीननेवानेयाकाखी मितिस्व
ल्पद्राक्षां॥ आम्रामलकयोः पेशीयनेन फलगतस्स्यां गृह्यते पंकोवेन संरश्लेष
पो वृष्ण मुखभंगया सांतासां संकोचो वृष्ण सुखां पानां के चित्संकोचं हेतु सुममाहुः यदि

दमित्यादिना सान्निपातकमदात्ययचिकित्सामाह॥ यद्यपि त्रयोदशविधः सन्नि
पातो वृद्धदोषा वामुक्तस्तथापि तथापि सर्वमदात्ययानां त्रिदोषजत्वादेयन
दद्यानादिमदात्ययचिकित्सितमुक्तं॥ तदकदोषोल्बणसन्निपातजमदात्यये प
चिकित्सितं भवति॥ तेन न द्विल्बणभेदहीनमध्याधिकभेदसमसन्निपातेषु
दशावशिष्टाः सन्निपाता नाभिप्रेयेदमुक्तं सन्निपाते दशविधे तु द्विकल्पमचि
कित्सा विकल्पस्य द्व्युल्बणयोर्मदात्यययोश्चिकित्सितं मिलितं कर्त्तव्यं॥ समसन्निपा
ते त्रयाणामपि मिलितं कर्त्तव्यं हीनमध्याधिकेभेदसमसन्निपाते षड्दशावशिष्ट
सन्निपातास्तान भिप्रेयेदमुक्तं॥ सन्निपाते तु द्विकल्पमिति चिकित्साविकल्पस्य द्व्यु
ल्बणयोर्मदात्यययोश्चिकित्सितं कर्त्तव्यं समसन्निपाते त्रयाणामपि मिलितं क

त्व्ये हीनमध्याधिकदोषत्रयावस्थानुचिकित्सापि हीनमध्याधिकविभागेन मिलि
ता कर्त्तव्या। मदात्ययस्य प्रहर्षिणीं चिकित्सामाह। चलेनेत्यादि। कस्मात् पुनर्म
दात्यये प्रहर्षजननी क्रिया कर्त्तव्येत्याह। संक्षोभेत्यादि। मनोविघाततः प्रायश्च
शरीरतः प्रशमनार्थं प्रहर्षिणी क्रिया कर्त्तव्येति भावः।। उक्तक्षीरप्रयोगस्य वि
षयं गुणं चाह।। लंघनेत्यादि।। तत्कार्यक्षीरनित्यक्रमं पुनर्मद्याभ्यासक्र
मं चाह।। पयसा विहित इत्यादि क्रमेणेति कालक्रमेण अन्योन्यमिति स्तोकस्तो
कमात्रं एतद्विपर्यये मद्यसेवायां दोषमाह। विच्छिन्नमद्य इत्यादि ध्वंसकवि
क्षयौ वक्ष्यमाणलक्षणौ ध्वंसकविषयौ चान्यौ सुश्रुते नोक्तौ केचिद्विच्छिन्नम
द्यः सहसात्यक्तमद्यो निषेवितस्य पानात्ययोद्दिष्टा विकाराः संभवन्तीति निरर्थेन

ध्वंसकविक्षयावनोद्यं वर्णयंति।। एतयोश्चिकित्सामाह।। तयोरित्यादि
कर्म्मेति चिकित्सा लोहीत्यादिना त्वक्षीणो दुर्बल इत्यपाकविक्षेपयोर्वति
प्रधानत्वाद्दर्शयति।। युक्तमद्यस्येति यथोक्तविधिना मद्यमाचरतः। सर्व
था मद्यपरित्यागफलमाह। निवृत्त इत्यादि जितेंद्रिय इति विशेषणं मद्य
निवृत्तेश्चैव प्रयोजकत्वात् शरीरमानसैर्विकारैर्निति योज्यते तया मद्यव्याप
त्तिजन्यैश्चैव शारीरमानसैः सत्यहेतुजान् शारीरमानसविकारान् प्रति
तु मद्यनिवृत्तिर्न किंचित्करोतीति यत्तु प्रभावेऽयं च्यध्यायसंग्रहः संग्रहा
र्थश्चाध्याये ऽनुश्रीयमाणोऽप्यत्रैवेति।। ।।मदात्ययचिकित्सितं समा
प्तं।। ।।मद्यमत्तस्य संग्रहाणादिना व्रणोत्पत्तौ व्रणचिकित्सितार्थं प्रति

म्रियमाणानां पुनरूपं तु शवतोऽवसन्न इत्यादिना प्रवक्ष्यद्दुष्टव्रणाना
हं गो प्यास्ते संकीर्तिता इति। एतेषामवस्थितादीनां भेदकारणानि तेन भेदेन चतु
र्विंशतित्वं भवतीति दर्शयन्नाह। चतुर्विंशतिरित्यादि। कल्पान्तरेपि तु व्रणदु
ष्टे कारककारणयोरभेदेन स्नायुक्लेदादिना भिद्यमानाः चतुर्विंशतिर्भवंती
त्यर्थः। त्वगित्यादि स्थाननिर्देशो व्रणाश्रयः। कोष्ठः सर्पिरित्यादिना गंधवि
शेषाः श्यावगंधं दध्यादेस्तान्येषु समानं गंधमाहुः। केचित्तु सावमिति पठंति
अत्र शवस्य गंधः शवेऽम्लसहचरितगंधो म्लगंध उच्यते। तसीकेत्या
दिनाऽस्त्रावानाह।। प्रकारांतरोद्दिष्टान् चतुर्विंशतिदोषानाह। स्नायुक्ले
दादित्यादि अत्र नखकोष्ठप्रतोदकमेव कान्तं पाचमर्षो माहि

षद्दनेनु कारणद्वयेऽंतर्रूपं व्रणवर्जनीया निषेधः निष्क्रियत्वं चिकित्साविरहितं
असाध्यो निरुपक्रम इत्यत्रासाध्यत्वमभिधायापि निरुपक्रमताऽभिधानेन सोप
क्रमसाध्येऽप्यपथ्यं निषेधयति। अवस्थासु षट्त्रिंशदुपक्रमरूपायां चिकि
त्सायां वक्तव्यायां संशोधनस्य प्राधान्योपदर्शनार्थं पृथगभिधानं व्रणानामि
त्यादि उपक्रमनाह। शोफघ्नमित्यादि। शोफघ्न उपक्रमो रक्तावसेकादिर्वक्ष्यमा
णोषड्विधं शस्त्रकर्मेति पाठ्यादि अत्रैव वाहरणमेषणं च शल्यतंत्रोक्तमधि
कं कर्मद्वयमंतर्भावनीयं।। किं वा एषणं शस्त्रकर्मांगं न शस्त्रकर्मेति तच्च पृथगे
वपीडनं कलापादिना लेपनं पृथगभिगमार्थं वक्ष्यति निर्वापणं दहौ व्ययं शमनं
शोधनाशोपपीयश्च कलायो सम्प्रलेपनाविति शोधनरोपणकषायौ तथा

शोधनं रोपणं प्रलेपौ तैलेन तद्गुणो इत्यत्र घृतस्यापि स्नेहत्वसामान्यात् तैलेनैव ग्रहणं ॥ तेन यद्यपि च बाह्ये तैलघृतानि प्रत्येकं शोधनरोपणभेदाद्वक्ष्यति ॥ तथापि शोधनरोपणप्रतिकर्मद्वयकर्तृत्वमित्याद्वित्रमेवात्र तैलघृतयोरपि पानीयं । कासीसांस्तौ स्नेहौ तद्गुणाविति पठंति ॥ पत्रमेकं छादने द्वे भवतः । तेन यत्रमेकमुपक्रमः । छादनं केचित् द्विविधं बाह्यं वापि मतभेदेन वक्ष्यमाणं । उत्सादनं च निम्नव्रणोच्छापने अवसादनमुत्सन्नव्रणमांसक्षयकरं काठिन्यमार्द्दवकेन धूपनोन्मर्द्द इति काठिन्यकेतैस्वपनं एवमुन्मर्द्दनमपि त्रिविधं ज्ञेयं । व्रणावे चूर्णमपि द्विविधं वदंत्यन्त्र गुणकर्मजन्मकभेदेन एवं षड्विंशादुपक्रमा भवेति । शल्यतंत्रेषु षष्ठिरुपक्रमा उक्ताः तेष्वत्रैवांतर्भावनीयाः ॥ यथावस्त

मधुशार्कनावत् स्नेहशब्देनेति व्यपदेशः । द्विपेचमत्युक्तावपि जेनेति अंशसिपयसि सर्पिः सि तैलेच योजनीयत् ॥ द्विविधामित्यादौ सर्पिर्दृष्टे मर्द्दवी लोहैकथितापथ्यमिति ॥ एषणीयेषु पांडुं च निंबकोलकपत्राणि अत्र निंबरेतमदुं निंबकोलकमुच्यते ॥ किंवा कुलक इति पाठः । कुलकः पटोलेनातिरक्त इत्यादिनासद्व्रणलक्षणमभिधाय रोपणमाह न्यग्रोधेत्यादि । कषाया ॥ इति बहुवचनं निर्दिशत् यथोक्तव्यस्तसमस्तप्रयोगं सूचयति दोष्यास्त्वकु दार्वीविकं कवणाशोधनीहरिद्राघृतं तैलेनेव साधयेदिति । यथोक्तैस्तैलद्रव्यैरेव साधयेदिति घृतविषयमाहनन्तःपित्तोत्तरमित्यादि रोपणीयमिति वचनात् रोपणवद्घृतं कर्त्तव्यं न तु शोधनार्थं घृतं पक्तव्यमित्यर्थः । बाह्याथैत्यादौ

वक्ष्यमाणं वल्कलं वाक्ष्यं वापि मर्दहेतुभिरस्यंते। सव्यदक्षिण इति वामपरिक्षेपः
सव्योदक्षिणपरिक्षेपो दक्षिणः। उत्तरे त्रैवृतमल्याकं च तु दिग्धं च बन्धनोधः कार्य्य
स्तन्यादीनि षड्विरेचनशताश्रितीयोक्तानि। उरश्मकाशीनां। अथ।।ाणानि तन्य
तादीनि विरेचने द्रव्याणि छेद इति छेदनाहैकुष्ठ इति कतिते तवृक्षं विषदाह
भेद विषयं दाहकवस्तुभेदं च दर्शयन्नाह। स्वकुमानामित्यादि। दाहना
विशेषं विषवृक्षादिरूपं तथा विंदुबल्लयादिकं जानातीति दाहविशेषवित्
विषादिनामिति। भक्षितविषाणां यद्यपि उपत्रमेषु क्षारः पृथगूपठितः।।
तथापि शास्त्राभिव्यापारकत्त्वात्। शास्त्राण्युपक्रमं गृहीत एवेति स्व
क्षारमप्यवचारयेदित्यनेन विहितस्तपर्येदिति। तप्पीपार्थं कैकानयेत्

कुंकुमेत्यादि प्रकाननेनानु बध्नननं तथा सर्वपि किरपं तथा रोमजननं चैवसुपक्रमत्रय
माहात्म्यमाशुनिगृढंकीतीति। सबचोभवंति त्रिफलाकुसुमानीति।। त्रिफलावृक्ष
पुष्पाणि कुलात्रियंगुः कानाम मंजिष्ठ तसोत्तमपरदोषतवाअमृतासंग कपिकारु
च्छवकम्। द्वौ व्रणावित्यादि अध्यायार्थसंग्रहो व्यक्तः।।१२।। ।।इति द्विव्रणीयचिकि
त्सितं समाप्तं।। ।।२५।। द्विव्रणीये द्वे संख्या वच्छिन्नरोगचिकित्साभिधानानंतरं द्विसं
ख्याअनंतरत्वात्त्रिसंख्याशिरोवच्छिन्नशिरोवस्तिहृदयमर्म्मरोगचिकित्साभि
धानार्थं त्रिमर्म्मीयचिकित्सितमुच्यते। त्रिमर्म्मशब्देन हि त्रिविधमर्माश्रितरोगप्र
स्वास्थ्योपयाचाभिधीयते। तेन त्रिमर्मोच्छिनरोगानधिकृत्यते चिकित्सितं त्रिमर्मीयचि
कित्सितं प्रस्तप्रस्त प्रधानमर्मत्रयमवधानयति। सप्तोत्तरमित्यादि। तत्रानीतसं

ख्यामधिरुह्येति। ग्रानीरसंख्या ग्रानीरेऽत्तमधिरुह्येत्यर्थः। हृदयादिमर्म
प्राधान्ये हेतुमाह॥ प्राणाश्रयादिति। हृदयानां प्राणाश्रयत्वे एवोपपत्तिमाह
तानिहित्यादि हृदयाद्युपघातेन यस्मात् विशेषतः प्राणोपघातो भवति।
तस्मात् हृदयाः प्राणायुःश्रिताः प्राणा उच्यंते॥ यथा शिरउपघातोपहन्यमाने
चित्रे भित्त्याश्रयमुच्यते। तत्तु संश्रितानामिति प्राणाश्रयाणां हृदयादीनां
संश्रितशब्देनाहि श्रयमुच्यते। महांतो गदा येष्वित्येवं तेषां महागदानां
वस्त्यादीनां अनुपालनार्थं क्षीणं रक्षणं वक्ष्याच्च। वस्त्याद्यपेक्षया रोगगृहेपाहृ
किंबोत्तसंश्रितानामिति वस्त्यादीनां संश्रितानामिति प्राणानां मर्मणां
पालनार्थं महागदानामिति महावस्त्यादिकरख्यापत्तिकरवस्त्या

दिकानां रक्षामिति चिकित्सां वस्त्यादिजानां यथात्र मंहेत्यादिनाह। कषाययादि
कुणपाः कटुकः पंका ग्रायइत्यादिना उदावर्त्तसंप्राप्तिलिंगानि चिकित्सितानि प्राहानु
कथमपानः कुपितोऽपानस्यैव संगं करोतीति मारुतसंगशब्देनोच्यते। अरूमः
आमनेवायदुष्टः सन्नु प्रवर्तमानः आमनः संगं करोतीत्युच्यते॥ यथामनेऽ
वमनो निग्रहं करोति। उत्तं इंद्रियाभिग्रहकर्म मनसः सुखनिग्रह इति उ
द्विश्वेति उद्वेगमनः स्वभावः ते ज्वरज्वरनाशकमिति। शीतज्वरनाशः नाम
नागुर्वीसुत्तेवर्त्तिः पलवर्त्तिः श्यामेत्यादिपलवर्त्तौ श्यामात्रिवृत। भेदः दशभा
गा माषस्य यस्यां तादृशा भागमाषाः द्विगुणपिप्पलीविणं तिद्विभागलवणागुडेनेति वर्च
तेन याग लागुडेन वर्त्तिः कर्त्तुमुच्यते तावन्मानो गुडोदयः यावस्तुके पियंतेन

द्वितीयावर्त्तिः माषगुडेनैव कर्त्तव्या ग्रंखिनी श्वेतबद्धा वाटो मदनफलं वे समधु
मोरहद्धमः वक्षोघ्नः सर्षपः वेत्तघाटो मदनः । तेषां विधानं । इति फलवर्त्तिः व
त्तानां उक्तानां कार्यकरणे उदीन्मनो मौषधं वमनविरेचनौषधं वातेत्र्यंध इसा
दिनादोषभेदेन कर्त्तव्यतामाह ॥ उदावर्त्ते च पित्तकफौ वातकोपितावेव विज्ञेयौ
स इति यथोक्तौ विधि संतामयोपरिस्वस्थो ॥ मागः गुडवर्त्तः सीधुः प्रयोजनुबं
ध इति वस्तिप्रयोगसमुदावर्त्ते निबंधे ९ तच्च विरेचनं वस्तिदाने सप्राप्ताद्दृष्टं
पदुक्तेनन्यो ॥ विपित्तस्य निरूहदानं विवर्जयेत ॥ सफदीनान्यवस्यांस्तु दोभिन्ने
णविरेचनेचेति । द्विरत्तने यादौ यथोत्तरं द्रव्याणां हेतुपथ्यं सुवर्चिकाक्षारसु
खांबुना पीतमिति गोषः उग्रगंधा अजमोदा वचा स्थिरा वस्यास्येति स्वल्प

पंचमूलस्य शम्याकपूतीककरंजयोपि यत्र पूतीकशब्दः करंजविशेषणं तथा
हिज्जनूकेपः । सर्पिष्प्राह पूतीकपुनर्नवापि वानीयांबलास्सिद्धमित्यादि फलं च मूलं च
विरेचनोक्तमिति दीर्घिनी वितीयं ॥ मूलिनी फलिनी विरेचनकर्मण्युक्ते किंवा कल्पे विरेचे
नयोगेषु वक्ष्यमाणं त्राणासंख्या विनिर्जनस्य भेषजस्याभावसंयोग उदावर्त्तस्यैव हेतु
लक्षणविशेषसत्त्वात्त्रानाहसंज्ञां प्रदर्श्य तत्र भेषजमाह । वर्त्तनं सिंभेत्यादि व्यायामे सा
दिनावस्याश्रयरोगमूत्ररेखानाह । पथ्यमित्यादिना वातपित्तकफसन्निपातजानां द
र्शोपां संप्राप्तिमाह । तीक्ष्णाहि समीत्यादि । चतुर्णामियेकं रूपं विशोषयेदित्यादिना
चतुष्प्रकाराणामप्यश्मरीरोगनाह । चतस्त्रस्त्वश्मर्य इह च तंत्रांतरे वातपित्तकफे उ
क्ताजीर्णत्वाय वचापि च सर्वास्विमासु दोषत्रयजन्यत्वमपि संहरया यथादिय

याविच्चलेवैद्यलेग्निश्चमारुतः॥ तद्वद्बलासंवस्तिस्तमूष्मासंहंति सलिल इरयेन
सुश्रुते प्रतिपादितं तथाप्युक्टदोषाभिप्रायेण वातजादिव्यपदेशो ज्ञेयः॥ बोत
जायामश्मयीप्रबलेनं वा पुनामूत्राघातीयमापतद्दतः। केप एवोस्यनीरूपः क्रि
यते। एवं पित्ताश्मयामि पिज्ञेयं अतएव सुश्रुते श्लेष्माधिष्ठाना सर्वा एथाश्मर्य
युक्ताः॥ अश्मयुत्पादे दृष्टांतमाह पित्तेष्विव विरोचना गौमिति पित्तेषिति वहुकश्च
नेबहुशो गत पित्तबहुना पेस्मात तद्दया प्राणाध्याश्रिता प्राणाच्युते) क्षयाकदंब
पुष्पारसादयाविशेषा यथा योग्य तेयादोषभेदाद्दुन्नेयाः॥ तत्र वातेन कदंबपुष्पाकृति
त्रिपुटी पित्तेनाद्रुप तुल्यास्क्ष्मामधूचकपेन गुत्रेणाच क्षोभ्साक्षत इति। उरश्म
श्लोभान्मूत्रमार्गो वस्तौ वा क्षते तस्या इत्यादि॥ तस्मा अश्मर्यां व्यपायादि विपन्मू

त्रमार्गादिव्यपगात सुखमिति निर्देदनं एषेत्यादिना अवस्थामाह॥ भिन्नमूर्त्ति
तिअनरूपं तयाभेदनमूर्तिः॥ अत एव मूत्रयथातक्षेत्रती युक्तं तेनपातेन द्विधात्रि
धाभिन्नो अश्मनीसूत्रपथेनाक्षरंती स्थूलानो अश्मयवेभवति॥ शुक्रमलाइत्या
दि मूत्ररुद्धलक्षणं मूत्राय तस्था इति। मूत्रमार्गस्थिता क्षमेत्यादि= --मूत्रर
द्धमाह। क्षतजमिति। रक्तंक्षयदुःखकोपितमिति। अतिव्यवायात् सरोक्षयस
ति। वायुनाउदीर्य्यवस्तिमाहितं आध्मातमिति वस्तिपूर्णतामस्मिन्निति हस्ति
संचितनक्ते एवमेते मूत्रस्यानोदिष्ट अष्टौ मूत्राघाता मूत्ररुद्धत्रायध्येने हनिर्दि
ष्टास्याव्यतायेनत्रिमर्म्मीयसिध्धौत्रयोदशमूत्राघातावक्तव्याः॥ स्तेमूत्रस्थाने
सूत्रितात्रपि एकादशक्षुद्रघस्त्रवदविधीयते मूत्राघाता मूत्ररुद्धयोश्चायं

दे

विशेषो यत्तु कृच्छ्रमूत्रकृच्छ्रे पाव हति मूत्राघातयो विशेषः ध्यायने भेदेनैवोक्ताः ।
अन्ये तु मूत्रकृच्छ्रविशेषानेव मूत्राघातानाहुः ॥ यथायो यत यावा तद्विशेषादिच तु
मूत्रकृच्छ्रेषु मूत्राघातानेतं भाविये तीतेन नो क्तत्र ग मूत्राघाताभिधानस्य मूत्रकृ
च्छ्रापां चिकित्सामाह ॥ अद्यंजनेत्यादि । स्विन्नादिनाच पंचमूलीवा नहरतैमिति । तत्र
तत्र शास्त्रे नानहह रवेन प्रतिपादनैः पलेनः शालि विकारसमन्वितपाषापाने द्री
अन्यानित्येवं गुणान्ये वान्यानि तैल फलानि तिलो माओस्यात्तदि नीयन्द्यावि
धिमिति तस्याशितीयनिर्दिष्टे ग्रीष्मो विधिः तत्रैव शिशिरस्सैकात्र गाहा अ
पिययच प्युक्तौ तथापि विशेषपार्श्वाशीनग्रहणोः कूनपार्थं पुनरभिधानं
दंडैनकोहो मल इति व्यातं । पूर्वेण कल्पेनेति क्वाथेन मधुयुत्ताद्धरियायोगो

स्य चत्रपुषा न कुसुंभादि यत्र बीजमिति संबध्यते । क्षारोष्ण्येत्यादि । कफकृच्छ्रा
भेषजं क्षारादि नियुक्तमनुपानं क्षारोष्ण्याभीक्ष्णा उष्णं कटुकेऽभ्यंगपानु
प्रयोज्यं तु टिनैय स्सार सपक्षी सनाम ख्यातः । कोलप्रमाणमियद्धमाषकंमे
पाकै । उष्णः पाद्यंतोनिंबः शितिमारकः शालिचः लघ्वमित्यादि । एलेदेवलाहिंभे
षजं मिलितं त्रिदोषप्रभवे कृच्छ्रे कर्तव्यं । तच्च समष्ट पिदोषेषु नायोस्थाना
नुपूर्व्या चिकित्सितं कर्तव्यं न ज्वर इव त्रिदोषे कफस्थानानुपूर्व्या कर्तव्यं । मूत्र
कृच्छ्रस्य समात्रिदोषान्वध्ये हो पिनातस्थानव्यवेन वायुरेव प्रथमं चिकित्स्य इ
ति भावः । विषमसन्निपाता नवध्ये क्रियामाह । त्रिभ्योधिक इत्यादि । त्रिभ्यो

धिके इति ग्रंथः कफे तथा पित्ते तथा पवने इत्यनेन चक्रमेण संबध्यते॥ कफमारु
तोच्छ्र इति। प्रत्येकं कफोच्छ्रे च निहिता सा मिलितैव ग्राह्येत्यायामत्रमयचिकर्त्तव्या
श्वनाश्वा। अजमोदा चूर्णं पिबेदित्यत्र जलेनैव पानं लक्षणकः। कोकिलाख्यः कुष्ठ
रकः। शीतिमारुकः कुंदरः स्वनामख्यातः त्रिफलादिनेत्यामिति त्रिफलायाः प्र
येवं मूलभागाः भागद्वयं अम्लैरिति कांचिदादाभिः उत्तरगुणैर्वर्जितैः मध्यं वा
त्राम्लग्रहणग्रहणमपि वस्तिशोधनत्वाश्मरीभेदकत्वप्रकरणव्याख्यानार्थं पुनरु
च्यते। अश्मभिदिति। अश्मरीभेदी शीतोपलाख्यो पाषाणभेद इति। शा
ल्यया ग्राश्वभेदान्तहेतुन्न विधानेनाश्मरीप्रकर्षेति समीक्ष्य दोषमिति उल्वणं दोषं
समीक्ष्य तत्सद्धानः प्रतिकर्म कुर्यादिति। प्रतिकर्म कुर्यात्॥

प्रतिकर्म चिकित्सितं मधुसमाक्षपर्णीति मधुपर्णी गुडूची ओनंपर्णी पर्णीत्रिपर्णाजि
तादारपर्णी सपर्णीसमग्र इति त्रिदोषानुगतेनैतो विधाने ते विडंगः पक्षीयुचानां
वृद्धिकेति ख्याता खादेय सिद्धोऽयं वै खादेत। घृतं स्वदंष्ट्रा यादौ माहचर्यात् स्वदंष्ट्रा
स्वरसमध्यत्वगुणं वदन्ति। तत्र यतः स्वरससमत्वस्य हेतुत्वमेवेति। उक्तं हि जलदक
पकिल्कश्चतुर्गुणः स्नेहस्वरसः स्नेहसम इति तेन नक्षारवत्सर्वस्य हेतुस्वर वि
धानं ज्ञेयं स्थिरादिसादौ कालकृतमादिमधुरगुणांलः पाकानंकृतककर्म्मयोगादि
नोत्कारग्रपिाज्ञेयः कालांकलो बिकंकतः। विधिनैवतेनेति पूर्वघृतविधानेन स्वदं
ष्ट्रास्थाने स्थिरादीनि प्रत्येकं कल्पनीयानि स्वादुफलोछिनेनेति मधुर मधु
कक्षौद्रादि फलनिष्पन्नेन। तैलेन व्यायामेयादि मूत्रवरेच्छा सन्याना हस्तिगोग

चिकित्सितं समाप्य हृद्रोगं निदानादिक्रमेणाह ॥ व्यायामतीक्ष्णेत्यादि गदाभिचारो गो
गाणामसम्यगुपचारः। हृद्रोगकर्तृणीति हनं तैः यथा भीष्मकुरूणां भयशोकहन्तीति न
नन्जकाभ्यां कर्तरि इत्यनेनात्र समासः वैवर्णादिषु हृद्रोगजा इति वचनात हृद्रोगात
न कालभावितया वर्णादीनामुपद्रवमिच्छति ये तु वैवर्णादीनां सामान्यहृद्रोगलक्षण
माहुः। ते हृद्रोगेणासमं जायन्ते ॥ हृद्रोगजा इति विग्रहान्न लिङ्गं व्युत्पादयन्ति हृद्रोगाश्च
कियंतः श्चित्सीये विसरोक्तान्यपि चिकित्सा प्रकाशादिह संक्षेपेणाभिधीयते। यमैं
ति हृदयं तैलमित्यादिना यथाक्रमं चिकित्सामाह ॥ तैलादीनामत्र समभागानां पेयत्वेज्ञेयं
वयः वयस्थे यनेन वयस्थेयाद्युक्तीस्वरसयोर्ग्रहणं त्रिवृत्सर्पिः यत्रास्य पत्रेम
स्य सर्पिषः प्राधान्यख्यापनार्थं विकर्त्तिका इह हृदयपविकर्त्तिकाकाषायवेदनाकाथः

द्रुतः इत्यादौ नागरादीनां कल्कं पौष्करादिकाथे प्रक्षेप्यमाहुः। पथ्याशटीत्यादौ यम्केन
हृष्टः। गुडप्रसन्नालवणौ श्वयेनय इति ख्याते व्याख्येयं ॥ द्वित्रिफले इत्यत्र द्राक्षास्मये पञ्च
षकापि द्वितीया त्रिफला तृतीया इति पाठपक्षे फलाख्यक्षमैलाश्रीना इत्यादि पित्तहृद्रोगचि
कित्सिते क्षते इति क्षतक्षीणचिकित्सिते श्रेयसी नाम्ना खर्जूरमये खर्जूरफलैः क्षौद्रान्वि
तमिति साधनोत्तरकालेपादिके मधुयुक्ते स्वादुफलेनेत्यादौ च सा इति स्वरसाश्विन्नस्य
यादि कफजं चिकित्साधिकारात् शोवनाणीति कल्याणकनाणीतु दंबनेत्यादिके नेह तु दंब
नादिकाथेन त्र्यभागत्रये तरत्र त्र्यूषणचूर्णपादिके प्रक्षेप्यं सैलिलोव्याख्युनेइति तु
त्या सलिलानुपानः कल्पविधानेः दृष्टमिति नसायने विहिते। कल्पशब्देन चक्षुष्द
रसायनमुच्यते। प्राशमिति च्यवनप्राशं आगस्त्यमिति नेह विशेषणं त्रिदोषजे ऊा
दौ लंघनविधान हृदयस्य कफस्थानतया तत्कृते त्रिदोषजेपि कफ एवादौ लंघनेन

जेयमितिमतोऽस्ते त्रिदोषजे तु स्वपदोषचिकित्सासूत्रमाह ॥ हीनाद्वित्यादि । हीनवम
धिकं तं एनं हीनं व एषां दोषाणामेव क्षययत्न । कर्मशसं प्रशस्तं अधिके दोषे वितरते
यातनकार्यमितिवाक्यार्थः । अत्रैधिकमित्यादिना सान्निपातिक हृद्रोगाणां प्राया
भृ विषमूलं लक्षणभेदे च श्लेष्माश्रलमुच्यते । स्थितमिति प्रशान्तं जीर्णं अधिक इ
यननानिजं जीर्यति अधिके इयनेनत्वपैत्तिकं धृतं । पतैमिति द्राक्षा कात्म्य यादि
त्रिष्वेवयादिना सान्निपातिके मूलेमाह । मूलविरेचने तत्त्वन्मूलादि भिरेवविरेचनं
अत्रविरेचनोपपत्तिमाह । प्रायोनिनइत्यादि अत्रचानिलको के यद्यपि बस्तिरस्ति त
स्तथाप्यामाशयापक्वस्या आमाशयशोधनं विरेचनमेवदेयं त्रिमिश्चमिनिव्या
धितनृपीयेत्रिषिहत्वेनोक्तं ॥ विधानं त्रमागतशिरोगतचिकित्सायांवक्तव्या

योशिरोरोगप्रधानतानभूमिशिरोरोगहेतुत्वाच्च प्रतिश्यायमेवादावाह । शालाक्ये
प्युक्तं ॥ यिरु व्याधयः सर्वे प्रतिश्यायनिमित्तजाः तस्माद्रोगप्रतिश्यायपूर्वमेवोप
दिश्यते ॥ रोजयक्ष्मचिकित्सिते यद्यपि प्रतिश्याय उक्तः एवमथापि संतत्र यक्ष्मपू
र्वरूपयोक्तः । इहतुस्वतंत्र प्रतिश्याय उच्यत इति विशेषः रजोधूलिः अतिस्व
प्नो दिवास्वप्न अवश्यायेतितुषारेण संस्थान इति दोषदीनाभृते ॥ घ्राणान्तइत्यादि
नावातादि प्रतिश्यायानांचतुर्णंत्रिमालक्षणमाह ॥ स्वस्वरशोषरोगइ यत्रस्वरो
गः स्वरभेदः कफाद्युरवियादौ गुरुशब्दः कं ऊर्ध्वविशेषणः स्रोतः मीलितिनासाश्रो
तसि स्रवतीति प्रवर्द्ध इत्यादिना प्रतिश्याये जातानप्रतिश्यायक्षयबंधादी
नाह । अत्रसुखवनोगंयेन पठेति । तन्मतेशिरोगहणेनेवान्यरोगग्रहणं । एषां

तुदुष्टप्रतिश्याय पक्ष्मबधादीनां शालाक्यादिषु विस्तरः। अत्र तु प्रत्याधिकारत्वात् सं
क्षेप एवतो धो ऽभिधास्यते इत्यादिना दुष्टप्रतिश्यायादीनां अर्जुन लोमपर्यन्तानां च मेषां लक्ष
णान्याह। तुद्द इत्यादौ सद्इयमिति लः मस्तलुंगादिति मस्तिष्कात् कुर्यात् स पित्त इत्यादिना
अन्तर्लषिकामाह। सा च शिरोभवा तेया त्रिंशतीत्यादिना यद्यपि प्रतिश्यायो सन्न्ने न
शिरोरोगाणां लक्षणमुच्यते। तथापि स्वतंत्रो ऽभ्यनामपि शिरोरोगाणामेतदेव ल
क्षणं ज्ञेयं। एवं मुखरोगादिलक्षणं च पि वाच्यं सर्वैस्त्रिदोषमिति वातादिलक्षणे
मिलितैः त्रिदोष इत्यादि इत्यर्थः। नियतनमिति। मुखं श्वाव इसन्ये रक्ष्या यादि पित्त
ज मुखरोगलक्षणं शालाक्य प्रपंचोक्त मुखरोगाणां अत्रैव चतुर्विधमुखरोगे
अंतर्भावं दर्शयन्नाह। संस्थानेत्यादि संस्थानमाहारो दृष्यं रक्तादि आवृतिलिं

गं नामक्रीतादर इत्यादि एषां भेदाच्चतुःषष्टिविधानां भवति तेन शालाक्य एवोक्ते
या मुखरोगाणां तु विङ्कुकेतंडकादिषु एतत्संतं गतं निर्दिष्टं वैदेहमतानुसारेण
सुश्रुते पंचषष्टिरुक्ताः तथापीह चतुर्थं च तत्र वैदेहानुसारेण अदृष्टो तत्रे पोयं च
तुःषष्टि प्रथा प्रदेशमिति। यथाचिकित्साप्रदेशा आस्यरोगांत स्त्रिषिविष्ठ आवेवा
नोक्तानाह। अत्रापि शेषोक्ता वाचकेभ्यः पृथगुपन्न एवानोक्तको ऽभिधीयत इति न
पौनरुक्त्यं अतिलोभेनात्र रविरच्यते। तत्रापि लोभेनवृत्तं सानुताभ्यासमरकार प
दर्शयति। विबद्धसंबद्धं चतमिति विबंधयुक्तमित्यर्थः। नैकरसमिय नैकरसं न
देति गमित्यादिना रूपरोगानाह ॥ एतच्च शालाक्ये यद्यप्यष्टविंशतिरुक्ता तथापी
ह चतुर्थे निकपनिरोगेषु शेषाणामप्यावनोधो व्याख्येयः। शेषाणामपि वातादि
जन्यत्वात्। अन्यान्यापि सादिनात्व सानो। क्षिरोगाभिधीयंते ०प

देहो दूषिकोऽसृक्स्रावो वाहीति अस्य थोऽस्रस्रावी अनु तेनेत्रामयानां संख्या
माह। नेत्रामया षट्नवति। अन्ये तु नेत्रामये षट्च आचार्याणां विप्रतिपत्तिः। नेत्र
रोगाणां षट्सप्ततिं विदेह प्राह सात्यकीति माह। करालस्तु षट्नवति निःशङ्क
णालमते नैवरलद भिधानं। उक्तं लेत्रसप्रविंशति वर्त्मस्थाने वे संधौ प्रकीर्ति
ताः सप्तदश तु शुक्लस्थाः षड्रोगाः कृष्णभागजाः पंचविंशति दृष्टिस्थाः षोडशै
व च सर्वगा इति एषां ज्ञानोपायमाह। तेषामित्यादि। अभिव्यक्तिमिति लक्षणं उक्त
नेत्ररोगप्रपंचाभिधाने हेतुमाह पञ्चाधिकारे ष्वित्यादि बल इत्यादि लक्षणमाह
तेज इत्यादि तेजःशब्देन दाहोष्माणमभिमतः। स वाताद्ये युक्तः खल इत्यादि केचनाति
याजनीयांश्चेत्युक्तेजःसमीरमिति पठन्ति तेजःशब्देन पित्तमपि वर्णयन्ति। ह

रिप्रसवमिति कपिलतां शिरोरुहाणामिति केशानामश्रन्यर्थमिति। एतत् कायचि
कित्साशास्त्रस्य शालाक्याभिधेयप्रयोगे चरत्यतोऽर्थं मे बजसंग्रहमिति नेत्राभिधा
यके ग्रंथे प्रतिश्याये धूमनिषेधो वैरेचनिकधूमाभिप्रायेण वृत्तः। तेनेह स्नैहिकधू
माभिधानं न विरोधि पाणिस्वेदश्चोपनाहनं चेति। पाणिस्वेदोपनाहनं स्रावरोधा
द्वाविरत्र रोधशब्देन प्रतीनाहोऽभिधीयते। शंकरास्फोटय इति शंकरः प्रस्तानादयः
स्वेदाध्यायोक्ताः स्वेदात्तकनि जयन्ती घ्राणश्रोत्राक्षितर्पणीनां शिराणां मध्ये शिरः
सः सन्निपातः श्रृंगाटकः नावणं तेन तयुक्तमाह। प्रभावेत्यादिना दूषणामंदस्विं
न्नाविलिखज क्षीरोक्षणा पिण्डस्वेदनमंदोत्र स्विन्नान प्रस्थाकूर्चचूर्णानियमेन
प्रस्थाकूर्चपरिस्थ्या प्रधानत्वात् तिलचूर्णपादिकरो नैतलैव पीडयेदिति तैलेवाजी

क्षीरे पापीडनार्थमिपिपाके दद्यात्। एवं निष्पन्नो एतस्य तैलस्य दशमूलनिःक्वा-
थादिभिः दशस्वः पाकादयश्च तैलके अनुवासनस्यानुश्रोतोनुसाभियोनुगतस्ने-
तभावेन यो पाक शूया स्विन्नं निःष्पीडन विशेषे पाचनीये तेजके हि विदेहभावेनाय-
चनाद्वापि तैलानामणु तैलनामं दनादपि सर्वेषां देहानामणु तैलत्वानि वातोव्याप्रतिश्या-
य इति निवातो व्यागृहस्थायी॥ पित्ते सर्पिः पिबेत् सिद्धमित्यत्र श्वंभावेन सिद्धमेव स-
र्पिर्देयं न तु पित्तचिकित्सोक्तामं दे पित्त इत्यन्ये पित्ते देयं कषायं वमनमित्यत्र कफहृ-
तद्रव्यस्य तैव मदनं देयमित्यर्थः। अवपीड इत्येवं यत्र नस्य भेदोवपीडः। कटुभिः फलैरि-
ति मरिचपिप्पल्यादिभिः सुरसादिभिर्वा विरेचनस्कंधेत गणैः कालानि हिंस्रा-
बलेबाकटुकोलावपाकान्मुक्त इति पोक वचात्व्युत्युष्ठ्या ह। नेवेरा इति पीनसस्य

मंदीभूतवेगे रक्षापवेति नाशाशोपशोषु वेक्षते निशोषसुनास्सा रोगेषु वातादीन वेक्ष्य
तदुपशमनी क्रिया कर्तव्या स्वमनसेति जायास्थिरादिह्रस्वपंचमूलबलामधुके
यादौ तैलसमं क्षीरस्य जांगलमांसाद्धतुलावसस्तु प्रस्थत्रयमानं दशमूलस्य
दौ दशमूलादिभिः प्रत्येकं त्रिपलंमानैः सममयूरं व्यक्तिपक्षिव्यक्तिपक्षिग्रहात् पक्षा-
दि वर्ज्जितं जलद्रोण एव पचेत्। जलद्रोणे ह्यत्र क्वाथार्थं पानीयं घृतप्रस्थात् पादाव-
शेषः खलु चतुर्गुणो भवति। किंच दशमूलादीनां मूलचतुर्विंशात् पलेन मयूरे
पोकेन च सममर्दनं। तत्र चतुःषष्ठिः पलं क्वाथ्ये द्रोणमानं जलं माढकं देयं किं वा द-
शमूलादिना मयूरे पानं वमि तु लितायावन क्वाथ्यं भवति॥ तच्चतुर्गुणं जलमु-
सर्पिर्विभावयैव देयं मयूरमिति जीवनीय गणात्ते दशभिर्जीवनीयाभि

हिमधुरत्वप्रकर्षादिह मधुरशब्देनोक्तः। एतेनैवेति दशमूलादिमयूरकाथेमा
याथोक्तविधानकृतेन द्वितीयखर्जूरशब्देन खर्जूरफलं गृह्यते। अक्षोटादयउ
नपापथिका पूर्वयोगोक्तकाथविधानं यद्यप्यतेनैव कषायेणेतिपदेन लब्धं तथा
पि पुनः पूर्वकल्पेनेति वचनेनेह यथालाभमिति पदेन यथालाभकरपीयवंतक
कुल्व कर्तव्यं न काथ इति दर्शयति। अत्र प्रयोगत्रये जतुकपिः। ततः काथ्येचि
चितसिखिनं दशमूलीश्रेयसी बलामधुकैः त्रिपलैः सह सस्थिरांजीवनकर्षैः
पचेत। पयसा काथे अस्मिन्नेव चतुष्कं दुग्धं घृतं। यथालाभं जीवनबृंहणोवाता
माक्षोटकाख्यत्रिपलयुग मधुकैः खर्जूरतालमस्तकषष्ट्युलोपैश्च नरवदंष्ट्रा
भिः। तामलकी विषभागरिकेराशृंगाटकैः मृणालैः नास्वास्थिरासमैः सार्धं गो
जडाभिः सहतु मायूरं ख्यातं चतुःप्रयोगमर्द्दिजं बृंहणेषु मतमिति। अत्र मयूरस्थाने
मृषादीन् दर्शयन्नाह॥ आखुना मयूरापेक्षया स्वल्पमानेनाप्यत्रैकेन स्नेहसाने
कर्तव्यमियोऽधःश्रुते वैयत्र क्षीरः श्रुतैः सर्पिर्नस्यं। नस्यार्थिभिरवपीडस्य पश्चा
त् सर्पिष्पानस्यं देयं॥ कफानिलोद्भवयोर्द्वहि इयत्राकफोद्भवे निलोद्भवे च सुश्रुतवच
नात् ललाटशंखदेशे दाहः कर्त्तव्यः। उक्तं हि सुश्रुते शिरोरोगाधिमंदप्यप्रभृति
पुललोटशंखप्रदेशेषु दाहदिति संधौ ककुछनयनेमिति अनुवादिसंधैः ककुछनमनव
र्जने चात्र मस्तलुंगस्रावं वर्जनार्थं उक्तं च शालाक्ये। न तु कुर्वैत स्रावयतोऽथ म
र्त्तैः प्रयोजितान्नस्तलिंगं प्रकर्षपातस्मात्तेनैव योजयेत्॥ व्याघ्रकरंजन खीक्ष्ण
नकं छिष्यकापवकं रजाघ्नमित्यादि मुखरोगचिकित्सितं रजोघ्नमिति रोगपीडान्

तंस्रुदिवुद इति विरेचनं दाव्यास्त्वक दावीतिक पंचकोलयादौ चूर्णसमुदायात गुडो
द्विगुणपाकं वै घु मात्रा इति अथ माषगे मानाः कोले कोलो हं रव्यपालो हं चेति लोहस्थुते
लोध्रं पठंति। तत्र तत्ते हि। सुश्रुते पाठात रसांजन व्योष तेजोह्वा त्रिफला ग्निकं। रव्यहद्यू
मयवक्षारं लोध्रं च पंतिकोलकमिति। वातपित्तकफापहापहा इति॥ प्रत्येकमेव कोल
दयः। त्रयः त्रिदोषहराः। रसत्रियेति घनीभूत रसस्य संज्ञा तालुशोष इत्यादौ आर वा
स्येति पदेन तृष्णायुक्त तालुशोषे उत्तरभक्तिके मपि सर्पिःपानं निषेधयति। तालुशो
षेति। तृष्णा मूर्च्छा पिपीताश्च गभ्रिपय स्तालुशोषिण इत्यादिना यद्यपि स्नेहपानं निषि
द्धं। तथापीह ओष्ठ ष उत्तरभक्तिकं सर्पिः विशेष विधानात् कर्त्तव्यमेव। शिराकर्म
ति शिराव्यधनं तच्च सुश्रुत वचनात्। तालुनिज कार्यां च कर्त्तव्यं तुला मित्यादिना ख

दिरगुडिकामाह। द्विगुणा मतिभेद स इति। विद्वदिरस्य रुनै का भुक्ते व पते गन्धर्त्त
दनेल वंगादीना पल मानत्वं मैं म्भिण्ये मि म्भिपा भाषितादं तास्य गलरोगः पथ्य कुर्या लो
कयोक्ता ज्ञेयाः। पनाय णा मिति। पद्मयपां श्रेष्ठं से षज मिति यावत् चतुरानाच कानहं
ति मिस त्र कुष्ठ यादिना। अर्द्ध श्लोकोक्ताश्च नानो योगा वातपित्तकफ सन्निपात जेषु त्रे
मात ज्ञेयाः सर्पिस्यः पभिन्नतानी त्यादिना स्वरभेद चिकित्सामाह॥ वातादिस्वरभे
दलक्षणं च अपीह नोक्तं। तथापि राजयक्ष्म चिकित्सोक्तमेव बोद्धव्यं चिकित्सा यद्य
पि तत्रोक्ता तथापीह स्वरभेदस्याधिरत वातात्। विणोच्यते। चतुः प्रयोगे पि शिपा
नाभ्यं गगंडूषबस्ति प्रयोज्यैर्बला नास्ना मृता द्वयतैला नि च वात व्याधौ वक्ष्यमाणा
नि च्युषणा को शिके प्रोक्तं जीवनीय घृतं वा तनरक्ते वक्ष्यमाणं रषस्य घृतं तत्तु पित्त वि

किसोक्तेपित्तजस्वरभेदेचिकित्सितमितिसंबंधः। शुष्कमूलकेत्यादि। क्षारवतैलेमधु
शुक्तेचतुर्गुणमितिमधुप्रधानेशुष्कंचतुर्गुणंशुक्तंचयन्मस्त्वादिनवौभांडेस्यपुटक्षौ
द्रनागरंधान्यराशौत्रिरात्रस्थंशुक्तंसत्रेतदुच्यते॥ मातुलुंगकदलीरसौतैलसमौअन्ये
तुमधुकल्केनवदाययंति। शुक्तंतुचतुर्गुणमित्याहुः तन्नातिहृदयसंगमयतोत्रयत्नवे
मधुनःपत्रएवशुक्तग्रहणेनैवग्रहीतत्वात उक्तेचमूलकभस्मग्रातादिक्षारवचावल्ल
वपाकुष्ठैः। दारुनसोजननागरसौ। भांजनहिंगुघने। गृञ्जयचपलपूपनिंदतैरसै
चतुर्गुणैःशुक्तेतैलंविपक्वामश्नातिनाह। स्रवजंतुघ्नंवनाटकामित्यादौव्यातेयद्र
ष्मतइतिघुटघुदाहनिष्पमानयेत। वनाटकाःकपर्दकाः। गंधतैलमिति। गंध
द्रव्यकल्केनतैलेकिंवागंधद्रव्याधिवासितंतिलोद्भवंतैलंनेत्ररोगाणांसन्नम

त्रइत्यादिनानेत्ररोगचिकित्सितमाह॥ बिडालकोनेत्राद्बहिर्लेपः पालक्येबध्य
ते। निघृष्टमित्यादौतनत्रिभिरसक्रियेत्यर्थः। हरीतद्विति। हरीतकीघृतयुक्तोवि
डालकः कार्प्पासन्निपातेतुसर्वैरितिप्रत्येकवाताद्यन्त्र बिडालकद्रव्यैः प्रलेपनंका
र्यमित्यर्थः। पक्वेतंजनंत्र्यहादित्यत्रप्रायोअक्षिरोगाणांत्र्यहेणपाकात्त्र्यहादि
सुक्तंपाकलक्षणंतंत्रांतरे। प्रशांतश्वयुतामाक्ष्णोः संरंभास्तप्रशांतस्तामेदवे
दनस्ताकंडूपक्वाक्षिगदलक्षणंआख्यातंनंअक्षिसेकः सुमनःक्षारकःजा
तीमुकुलकेस्वेतमरिचंश्रोभांजनबीजंनीतिपुष्पंपुष्पांजनंमत्रः प्रसेप
कगतःपक्षिविशेषः। द्वौपिप्पल्यंतुवयोनयोः शाणावित्यर्थः। चित्रा
यांमितिचित्रानक्षत्रेबीजवनकुलत्थिकातांप्यौधातुविशेषापी

नदीभाव मज्जनं चक्षुष्या बलकुलच्छिका प्योष्य मंजनं पुष्पांजनं अतिन्न
चक्षुष्य इति अभिन्नतारकस्य रक्तास प्यस्येति मत रक्तास प्यस्या खालये
सादिना खालयादिना खालयादि चिकित्सितमाह। हरिलोम्नीति कपिललो
म्नी सहचरो झिंटी शैलासमेभोंड इति शिलोममसे पात्रे मेषशृंगादिषु नास्थि
तः॥ आदित्यपर्णीमूलानित्यादि = आदित्यपर्णी सूर्यावर्त्तः रक्षा त्रौनीयका॥
रक्षा झिंटी। सोमराजी शास्त्रे। रक्षापीलोहं रक्षापो। पिंडीतक चित्रकाचिति
रक्षामदनरक्षा चित्रकौ आदित्यपाके चेति॥ आदित्यरश्मिसंबंधादेव पक्के
अत्रबेकुभोगेति निबद्धवचनात् एव पथ्यगभावे लब्धे पृथगिति पदं न्यू
यसिद्धस्यापि त्रिफला पथ्यमार्गस्यायोर्तेनार्थं निकुंभ यास्मात्र वचनो दे

वभवं तत्र कल्पनीयं॥ तिलाः सामलका इत्यादियोगः केशरंजकाः पचे सैंधववस्या
दौ सैंधवायस्कूपतिंदुलानां। सर्वमहंशुध्यमिति प्रक्षालितेन शोषघुनो शेष्विति तट
श्वासकासज्वर रक्तपित्तशोषेषु पीनसोपद्रवतयात्तेषु शोषेष्वादौ निर्दिष्टो यत्र शो ष
शब्देन अनुरत्रिममज्जिरोगग्रहणं आदौ निर्दिष्टेति॥ सामान्यादिहैव दोषा लेखन
त्रिममज्जितोगादित्यत्ति किं साज्ञेया सिद्धोच्च वक्ष्यत इति त्रिमज्जीयां सिद्धो वक्ष्य
ते॥ उक्तानुक्त चिकित्सार्थमाह॥ वातपित्तेत्यादि वस्तिक्रम द्वंद्वया इति यथासंख्ये
नतत्स्थान समीप्यादिति। वातादिस्थानेषु नस्यादिषु च वमनादीनां कर्म्मणां मध्ये
यस्य कर्म्मणः सामीप्ये दोषहरण सामर्थ्यरूपं भवति। तेन कर्म्मणा हर्त्तव्या इति॥
जातादीनामेव विरुता विरुतानां देहपीडकत्व चोरकत्वं स लक्षणं तमाह॥ उन्ध्यामेसा

दिव्यास्य लोकः लोक इति जगत् । अत्र दृष्टान्ते इन्दुस्थानीयः श्लेष्मा रविस्थानीयं
पित्तं विरुद्धैः पीड्यते । अनिलैर्धीयत इति । व्यवस्था दोषाणां परस्परानुपघाति नो धारा
संभूय कार्यकरणे यथा विरोधो न भवति । तदाह । विरुद्धैरपीति परस्परविरुद्धैरपि
यथा श्लेष्मापाः स्नेहपैच्छिल्यगौरवादयः वातगुणे रौक्ष्यभाववादिभिर्विपरीतानां च
परस्परानुपघातकत्वं यद्दृष्टं तदिह दोषसंसर्गे न भवति । कुतो न घ्नन्तीत्याह । जसामान्
यादिति स्वाभाविकामासीभावादित्यर्थः । सामीभावो नुपघातकत्वं अयं च स्वभावः
कर्मजन्यो वा भवतु वस्तुस्वभावाधीनो वा भवतु । उभयथाप्यचिन्त्य एव द्रष्टव्याच्चन
त्र युक्तिबाधा न भवति । तेन यात्र सहजतादिना परस्परानुपघातो व्यभिचारः
चन्द्रिकाचरितासु श्रुते प्रपञ्चितः स नात्र भवति । निरुद्धस्याप्यानुपघाते दृष्टान्तमाह

घोरं विषमहीनिवेति मर्मजानाभियादिसंग्रहो व्यक्तः ॥ ॥ इति त्रिमर्मीये चिकित्सिते
समाप्ते ॥ ॥ त्रिमर्मीये वक्तव्यरोगात् पञ्चकर्मसाध्यात् दृष्ट्वा पञ्चकर्मसाध्ये ऊरुस्तम्भो
तत्स्मरणादाचार्य ऊरुस्तम्भचिकित्सितमवाह भवति हि । विरोधदर्शनात् पित्तादिनाध्यस्म
रणे यथानुलक्ष्मरपात । सर्पस्मरणं अहीन पूर्वमिति सर्वदायुक्ते समस्तानीति मि
लितानि पृथगित्यमिलितानीति इति वा नेत्र शब्दस्याव्ययत्वात् । दोषजा इति पदं सानुसा
गं तु रितोर्थे भिन्नाः सश्वेतयोः पञ्चमर्माविषयाः प्रसिध्यता । तथा दोषजस्याप्यस्य
साध्यस्य साधनं पञ्चकर्मापि समर्थानि लेनत भिन्नासाथमाह । साध्यस्येत्यादि । साध्य
स्यमत इति संबन्धः ॥ इति भयतु यजुरुस्तम्भस्य करणादिपथ्यो गुरूः जीपालिपइति
स्तोकत्रोषजी पइ इत्यर्थः ॥ ग्राम्यैर्वर्तिते स रोषरूपं कोष्ठ्य पल्लेपेनाऽप्यमेस वितांमदस्सा

सा

सहेति मेदःसहितमामं वातादीनां बोध्यनुकेज्ञेयं॥ आमं चउरुं स्तंगच्छति॥ दोषसहितमे
वजोति सितादिभिर्निति सिथा धमनीस्त्रातौ भिदोषा मेदोचटइति दोषः। आमसंरुद्धवा
तादि यदा दोषा मेदोच्चटइति पाठः। तदा आमस्यैतद्विशेषणं। सक्थिग्रहणेनैव यद्यपि
गंजनैघोरपिग्रहणं प्राप्तं तथापि तयोरभिधानं॥ विशेषणात्तत्पूर्वोपदर्शितार्थेउ
विधेयपनिस्पंदनिःस्वाधीनमिंद्रियंअल्पविज्ञमसमिति। अल्पं विज्ञमंगानेनाल्प
क्रियंअक्रियं वा करोतीत्यर्थः। महासनसीत्यादि। दृष्टांतेन उरुस्तंभात्रेककप्रधान
स्यकफस्य प्रबलतामाह। यद्यपि चोरुस्तंभस्यासत्रिदोषजन्यत्वमिह तथा सूत्रस्था
नेप्येक उरुस्तंभ आमत्रिदोषजयन्येनोक्तः। तथापि कफप्राधान्यादत्र कफस्य परि
ग्रहः। अत एवाग्र उरुश्लेष्मकादिना उरुस्तंभशब्दनिवृत्तिः। सुप्तादसामग्रीमाह।

स्वेदयेच्छैत्याभ्यामिसनेन स्तनक्रियां स्वेदयेच्छैत्यर्थः। कफगुणायोःकारणात्। दुरयिति
उरुस्तंभे स्नेहप्रयोगजं दोषमाह। वातशंकिनेत्यादि। वातशंका चास्मिन्समः संकोचादि
वातसमानलिंगदर्शनात्। अस्य संस्नेहदोषाः॥ स्वेद्धादुद्वनपातथ्येयंतोमात्रा जंघोरुग्लानि
रित्यादि तु लक्षणमुरुस्तंभस्यान्ये तु सद्यमिनेतत्तउध्वाधिःक्षतस्नेहदोषमाहुः। आदाह
नेदानेन उरुषं दाहवेदनाः अन्ये तु दाहवर्जितवेदनामाहुः। पदेत्यादिना सुनरसाध्यत्वलक्ष
णं पूर्वोक्तासाध्यलक्षणभिन्नसामग्रीकं ब्रूते। अन्ये द्वत्त्व। दोषप्रयोगत्वमासाध्य
लक्षणमाहुः। संप्रति स्नेहेवक्ष्यादि प्रतिबाधोपपत्तिमाह। तस्येत्यादि स्नेहस्यात्र
दोषाय यद्यपि प्रागवीक्ता तथापीदानीं यथा तद्दोषकारकं स्नेहनं भवति। तथा प्र
तिपाद्यते शिरोविरेचनं भवति। तथा प्रतिपाद्यते शिरोविरेचनेचात्र सद्यधि

नासेभाव्यमानत्वादेव नोपन्यस्तमिति ज्ञेयं। स्नेहनमिति पानाभ्यंगाभ्यां स्नेहनं व
स्तिकर्म तस्यैव श्लेष्मवृद्धिकरत्वात्। किं वा वस्तिकर्मविशेषणं स्नेहनमिति। वहेतेमा
न्नवलशमेव लभ्यंते। निरूहविरेचनशब्देनैव शोधनाभिधायिना गृहीतः। अन
एवोरुस्तंभदोषाद्धरणासमर्थशोधनविवरणाएव निरूहोप्यत्रोक्तः। दोषहरणासा
मर्थ्यं निमनविरेचननिरूहणांत्रमेपा विवृण्वनाह। श्लेष्मस्थानगत इत्यादि हेतुसा
कयमिति विक्रित्सितलिंगपंमिणामातुरशक्याविति च्छेलानक्ष्यमाणयोजनीयं। ये
तावुभाविति निहेतुशक्याविति पूर्वेण योज्यं। सर्वेषां हि वातपित्तश्लेष्मणा इस
दौ मूलनिर्जयादिति पदं। वमनादियत्नेन तथा विरेचनादियत्नेन तथा विरेचना
बस्तिभिर्भिसनेनेच योज्यं मूलनिर्जयादिति मूलच्छेदात् वमनादीनां साध्यवि
षयं दर्शयित्वा तेषामसाध्यविषयमाह॥ न वामेत्यादि तथा ममेदस्तब्धत्वेन वमना
यशं क्यं जंघोरुद्वानेन च वमनादीनां सामर्थ्यमुक्तं ज्ञेयं। हेतुं तत्र मुरुस्तंभदोषस्य व
मनाद्यहार्यत्वे प्राह। वातस्थान इत्यादि वातस्थाने इति जंघोरुरूपे वातस्थाने तस्थे
यादिनि वातशैयात चिकित्सामाह। तस्येत्यादि। तस्योरुस्तंभस्य शमनं कर्तव्यं न शो
धनमित्यर्थः शोषणं क्षपणमाममरुपयोः कुर्यादिति योजना। तत्र क्षपणं सद्यः शोध्य
देन शोषणं द्रवभागविशेषणं नायसी काकमाची कुलक काच वेल्लुकं शाल्मली वेष्टकेन ना
ग्यपि मधुना पिबेदिति संबंधः। स्वस्त इत्यादिका पंचयोग्यः। अर्द्धरूपोक्ताः चूपश्लोक
शो गुड्या सुजा स्वादु कंटक विकंकतं पूर्ववदिति पूर्वया संबध्यते। गुग्गुलुं च मूत्रेणाप
षितं पिबेदिति योज्यं जलापुतं पिबेदिति शेषः। फलीन्यग्रोधः हेमनागकेसरं आना

स्विद्वं क्रममाह। अपतर्प्पणाजइसादिरूक्षणादियादिना। स्नेहे विधानमावस्विद्वं तेन
सामान्येनात्र विहितस्नेहनिषेधेन समेन विरोधः। अस्य विधेन यवादत्तात। पीलुपर्णी
मारटरास्नाभेद इत्यन्ये। सक्षौद्रमिति। पादिकक्षौद्रात्। अजगंधा अजमोदा भल्लातका
स्थी निर्विंशतितियारत्तिमानेन पलाभ्यामिति पिप्पल्यादिसमुद्रायात पलाभ्याम
ष्टकत्वद्व इति तैलादष्टगुण। कट्वरः कट्वरं तक्रं। पिचुमर्दो निंबः। द्रवन्ती दंतिभेदः।
तक्रारी जयंती गंधा इत्यगुवाच्या उक्ताइह ग्राह्याः कुठेरकः पर्णासः ग्रान्येष्वंतः प्र
द्रुंराक्येषु कल्पमिति प्रातःशिना मिति हिंस्राजलजंत्ररहितोसुगम्यां ननु जल
प्रततपां कथमस्य श्लेष्मक्षयं कर्त्तं भवतु पानता जलसंबंधमात्रपाश्लेष्मवृद्धि
रेव उच्यते। जलेन बहिर्निर्गच्छद्दूषणा निरुद्धत्वात् प्रवेशादि श्लेष्मसंघात

भेदनं भवति। तथा प्रततरपाक्रियया च स्विन्नः श्लेष्मा विच्छिद्यते न समानलिः अप्य
त्रक्रियायोग्यतात् क्रियत एव। उक्तं हि। भवेत् कदाचित् कार्याऽपि विरुद्धाऽपि मत
ता क्रिया इति। अनुक्तचिकित्सापरिग्रहार्थमाह। एतस्यादियादिहेतुनियादि। संग्र
हे कर्म्मयोग्यत्वकारणमिति पंचकर्म्मयोग्यत्वे हेतुर्वृद्धये श्लेष्मपाइयादिनोक्तो ज्ञेयः
द्विविधमिसांतरबाह्यं च भेषजं॥ ॥ऊरुस्तंभचिकित्सितं समाप्तं॥ ॥ऊरुस्तंभभेष
जेन विरूक्षणात् वातप्रकोपो भवति। संबधादूरुस्तंभानंतरं वातव्याधिचिकित्सितमु
च्यते। तत्र वात एव व्याधिर्वातव्याधिरिति पक्षे वात एव तत्र दूष्यसंपर्क विरूत्तश्च
सर्वशरीरैकांगरूपतामापन्नो विविधपीडाकर्तृत्वात् वातव्याधिरित्युच्यते॥ यदानुवाता
ग्धाधिर्वातेरितिपक्षः तदा वातादोषात्। दोषदूष्यसंमूर्छनाविशेषरूपः सर्वांगैकांग

न्रूपो वातव्याधिरुच्यते। ज्वरादयस्तु यद्यपि वातादुत्पद्यंते। तथापि ते दोषांतरेणापि वातं
विना भवंतीति त्येवान शास्त्रे वातव्याधिशब्देनोच्यंते। योपि चात्र कफपित्तावृतः वातविका
ना वातव्याधित्वेन वक्तव्या। तेपि प्रधानेन वातेन विना न भवंति वातव्याधिरूपा एव न चाशा
च्यं। वातिकाश्चान्ये नानात्मजा व्याधयः पृथक् चिकित्सायामुच्यंते। तस्मात् पित्तजाः कफजा
श्च पृथक् चिकित्स्यंतामिति यतः पित्तकफवृतानां नानात्मजानां न तथा प्राधान्यं। यथा वा
तजानां ते न वातजानामेवाविस्कृततमानां पृथक् चिकित्सोच्यते। कफपित्तजानां चनाविस्कृ
ततमानं विरेचनवमनादि पित्तकफचिकित्सातो दिशेयं। वायोर्विकारं तापयंतु स्वभावतो
नां तत्तीयकत्वादित्वत्तिसोनस्य स्वभावमेव तावदाह। वायुना सुरीयादि। यद्यपि शरी
रेंद्रियसत्वानां संयोग आयुस्तथापि तादृशसंयोगे प्रधानत्वात् प्रवृत्तिरेव वायुरा
युरुच्यते। एवं बलाधानः हेतुत्वादीनत्वयाबलस्यापि हेतुर्वायुरिति त्वाबलमित्युक्तः

विंशाबलमिति बलवान् धातुं च त्रीनीश्च नवपधिानकत्वात्। विश्वरूपत्वं तथा प्रभुत्वाच्च वा
योर्विलकलाकलीये प्रतिपादितैव ज्ञेया वायोर्वायुहेतुत्वं दर्शयन्नाह। अव्याहतेत्या
दि। अव्याहतगतिर्यस्य नागेन मार्गस्थानस्थ इति न विमार्गगः। प्रकृतौ स्थितः
इत्यक्षीणवृद्धो वीतरोग इति नीरोगः प्राणोदानेत्यादि। मान्यवहमार्थसंज्ञोपदर्शि
तपूर्वकं। प्राणादीनां स्थानं कर्म चाह तं दर्शयन्॥ इति यानयतेस्थानेष्विति। वक्ष्य
माणासीयं स्थानेषु च्याहारादिन्यत्रादि ग्रहणांदनुविधानपायद्यपि ग्रस्यते। व
र्मेति प्राणस्य चायाद्युपथ्यः॥ प्राणोदानयोर्यद्यपि समानमुरःस्थानं तथापि
कर्मसिद्धांतभेदवगसथेकायां हस्थितमानाकारकुत्सकारयोः प्रयतनं प्रयत्नः
उर्जो बलं वर्णनेन हर्षो जो बलवंतमिष्याद समुच्यते॥ स्वेददोषेत्यादो स्वेदवहा

१७१

नितं थांसुवहानि च स्रोतांसि स्रोतो विमाने पृथगेवोक्तानि ज्ञेयानि ज्ञेयानि दोषव
हानि च स्रोतांसि सर्वशरीरचराण्येव। उक्तं हि। वातपित्तश्लेष्माणां पुनः सर्वश
रीरचराणां सर्वस्रोतांस्ययनभूतानि गतीयादोषादिशब्देनाकेचे प्रसादपाचने
चग्रहणं पत्रस्थ इति वक्ष्यादि गतेः सृजतीति विसृजतीति निःसारयतीति यावत्
आर्त्तविमद्धेवसृजतीति सबंधः। एतानि कर्म्माणि यान्तु स्रागः कुर्वन्ति। तदाहृ यन्ते
इत्यव्यापन्नाः। स्थानस्थिता इति यथोक्तस्थानस्थितान यस्मादेवं भूताः अतो
देहो धारयन्ति॥ तेनना मयः॥ नातोनां गुप्यकायमाह। निमार्गी स्वस्थानकर्म
जेति तिपरस्य वायोः यतः स्थानमुक्तेतत स्थानगतेः तथा ध्वनादि यद्वायोः रोगे
त्रानीरं पीठयंति। प्रपानाम हतारोगेषां हरंति। अन्येच वायोरेव

प्रसिद्धधानरोगकर्त्तृतिथा भिन्नचिकित्सायथोजन्मः पंच भेदा उक्ताः। न पित्तकफयो
रन भिप्रायो जनालोत्। तत्राहि तेत्रात नेपित्तरपित्तमपि पाच करंजकसाधकलोच
क। भ्राजकभेदात्॥ पंचविधमुक्तं तेषांच यथाक्रमं हृदयामाशयजिह्वाशिरः सत्वयस्था
नेकर्म्माणि च यथाक्रमं श्लेष्माणां अवलेवन। अनुक्लेदन रसबोधन अक्षितर्प्पणा
संधिश्लेष्मणानि प्रकृतिवातव्याधिकथनयत्रासेरव्याधिकथनमित्रेसादितज्जा
नामिति पंचवातजानां सूत्र इति महारोगाध्याये अनुच्यमानानि तिनख भेदादीन
यथास्थूलमुच्यमानानपर्यायैभिति संज्ञातनै मुखभेदादि शब्दैर्वाक्यमिसर्थः
कथं पुनस्ते अशीतिनखभेदाया उद्दिश्य उच्यते। केवलं वायुमुद्दिश्य केशितगा
दानेपश्वादय उक्तास्तथा आवृतंच वातमुद्दिश्य केचिदुक्ता लिंगपित्तावृत्ते।

दाहस्त्वथेत्यादिना। संप्रति दिनमाहरूक्षेत्यादि विषमादुपचारादिति। उपचारो नैरूप्यात्
दोषात्स्रुतिरित्यादौ दोषशब्देन पुरीषमपि गृह्यते॥ अपतर्पणादिति। गजादिषु पतनात्
किंचात्र अवतर्पणेन धातूनां कर्षणं उक्तं हि। खरणादेवलिखसति तैक्ष्ण्यात् प्रद्रावात् उद्वे
खनमतं मतं विकाशित्वाच्चैव वक्रचात् तमवतर्पणमिति भित्तानीति तु ध्वानिःस्नेहादिगुणाश्र
यानीत्यर्थः। अव्यक्तं लक्षणमित्यादिना अत्र वैशेषिकपूर्वरूपं निषेधयति। आमरूपमि
ति वर्त्तमानरोगरूपं अप्यये लघुता पुनर्भि निवातव्याधीनामपायो अपगमनं शरीरस्य
लघुता वातव्याधिलिंगनिगमनशरीरकल्पनेतियावत्। किंवा वातव्याधीनामुपशमो
वा अपायो यत वातलिंगानां लघुता न सर्वथा वातलिंगाभावो येन प्रकूलवातलि
गानि साध्ये च तत्र कुपितानिन कार्य्यसाहस्संकोचइत्यादि। एतेन संकोचादयो
व्याधयो पिनर्वंति हुडने शिरःप्रभृतीनामंतःप्रवेशः अन्ये तु केचन भूमिस्फुटनेन ललाटप्र
देशस्य शिरो हुंडनं। उक्तं हि। व्याधयस्ते तदात्मलिंगानीत्यनिनामया इति। वातव्याधिविशे
षमादे हेतुमाह। हेतुस्थानविशेषादित्यादि हेतुविशेषः। पित्तावरणादिः स्थानविशेषः को
ष्ठादिः किंवा हेतुरुक्त स्थानविशेषः। उक्तं हि प्रकुपितास्तास्त प्रकोपनविशेषात् दूष्यविशे
षाल्दूषयंत इत्यादि। केचित्तु देहस्थानविशेषादिति पठंति। स्थानविशेषरस्तमेव व्याधि
भेदमाह। तत्र कोष्ठाश्रित इत्यादि। सर्वांगकुपित इति स्वस्थदेहकुपितः गुदस्थित इत्युक्त
गुदस्थिते। आमन्यत इति विस्तार्यते॥ शुक्रस्थस्तंभ इति शुक्रे वत स्वात्र स्तंभो भवति
गुर्वंगमित्यादि मांसगमेदोगं च लक्षणं समानं तथा मेदःस्थे पच्ये वामित्याद्यस्थिमज्ज
गयोः समाने लक्षणं समाने लक्षणे त्रविविधाश्रित पीतीयोक्त विशिष्टआतु दुष्टिर्धा

तुलक्षणौ विशेषउक्तेयः। संततेसत्तु बद्धाक्षिप्रमुंचति॥ बध्नातीति सूत्रे विरोधय
ति। वातथागर्भमपिमुंचति॥ वाक्षिप्रं चिरंधारयति विरतमिति। व्यंगवादिनानावि
कारसुतंगर्भंजनयति॥ व्याधेस्यादिना स्नायुगतवातलक्षणं तैगोक्ता निबहिरायाम
दिन्यग्रव्याकर्तव्यानि मंदरवं गोपमिति मंदरजं मंदगोथेत्व मंदसुप्ता इति निष्पंदः॥
इदानीमतिबलात्वातविकारान्निधातुमुपद्यते। अर्दितमाह। अतिरध्वइत्यादि
अतिवद्धग्रहपानवायेविलवलप्रकुपितवमाह। एकमिति वामंदक्षिणंवा। संकोचय
ति पादं जानुं चेनत्रं व्रजति भोजनमितिनसमं मुखेन खादति। किंतु वक्त्रैन देशेनहो
नेस्यगंसीनाजिघ्रेति। कुटिलाः सुमुतक्षिसेसमिताफले स्यव्यक्ताबध्यते। श्रवणा
दितियद्यप्येकपार्श्वश्रियीविकारोयत्तथापि प्रभावात् कपोतिरवधौ प्यत्रके

ल इह सर्वदेवक्तस्ना। ननुयदा देहार्द्धव्यापिनं। अर्दितस्य तदार्दितेनार्द्धांगेन कोभे
दः। त्रमेः। उअर्दितं वेगितं फान सर्वकालेभवति। अर्द्धांगेस्तु व्याप्तं भवति। उक्तं हि॥
स्वस्थस्यार्धाद्दितोष्या नो मुहुर्वेगेनगतिइति। किंवायथोक्त विशिष्टलक्षणार्दितः। अ
र्द्धांगेतुनैतानि सर्वाणि भवंति। मध्य इत्यादि। अंतरायाम्यं तर्पदानाभी प्रपद्यत इति
मन्यासंबंधाएवाद्यस्रूरसताः शिराः प्रपद्यते इत्यर्थः। उअंतरायामसंज्ञकमिति
एवंविधो मन्यास्तंभः त्रों तरायाममनुच्यते। अपरस्तु मन्यास्तंभो वक्ष्यमाणो बहि
त रायामाय इतिवक्तव्यः। तत्रांतेतुमन्यास्तंभउआयामयोः पूर्वरूपत्वेनोक्तः॥ अंतरा
यस्यत इतिअभ्यंतरे पार्श्वेष्यते। एष्यायाम इति पश्चबहिर्निर्गतिपृष्ठे स्यादि
बहिरायामलक्षणं। पृष्ठमन्याश्रिता इतिपृष्ठानुगतमन्यासंबंधा इतिवाख्यादि

ति क्रियाविशेषणं। बाह्यस्य क्रिया: पृष्ठगत एव। केचित् पृष्ठमन्याश्रित इति वातविशे-
षणं पठन्ति। पृष्ठेतोद्रियत इति पृष्ठे न स्नावरुष्यते जातवेग इत्युद्वेगः प्रेतो। आयामो बाह्यां-
तनायामं खल्लीत्युच्छ्रूनमेव च। सवैरिकोगमो गोश्च वक्रयति। स्नायुगतो निल इत्यनेन स्ना-
युगतो निलजन्यावुक्तो। इह च मिंगतवातजन्यत्वेनोक्तौ तेनामयवच्चनात क्रियास्ना-
युगतवातजन्यावेव भवत उक्तं चान्यत्र माहा। हेतुनलीवायुः क्रिया: सस्नायुकंडरा:॥
मन्यापृष्ठाश्रिता बाह्यासंयोग्यामयेद्बहिरित्यादि। हनुस्तंभसंकोचयोर्लक्षितमूलक्रि-
तइत्यादि स्तंभयतीति व्यापयति। विवृतास्यत्वमथवेत्यत्राथवा शब्देन संवृतवक्त्रता
पाक्षिकी वापेक्ष्यते। संस्तभ्येति निश्चलीकृत्य संवृतमुखतां करोति। एतत्द्वयमपि
हनुस्तंभ एवमुक्तं मुखहि पि याक्षेपक लक्षणं पाणिपादेत्यु संशोषेत्याद्याक्षेपकत्वे प्राप्ति

कथनं पाणिपादक्रिया इति दंडकलक्षणं। अर्दितादीनां कुंडकांतानां समानरूपमाह
खस्थस्यादित्यादि। अर्दितहनुस्तंभादौ यत्र मुखमुखवैगिनं दृश्यते तदर्दितं तत्रमेव सं-
ये। किं वा विकारा तत्रमेव कुंजगिवातादिरूपं ज्ञेयं। इहैकमित्यादि पक्षपांगह्रीनादिमित्या-
दि। एकांगलक्षणं सर्वांगसर्वदेहजमिति। सर्वांगलक्षणं स्त्रिवपूर्वेत्यादि स्फिजं प्रथ-
मं स्तंभरुके भेदैरर्दितानि। क्रमांनुकटीपृष्ठोरुजानुजंघापादं गृह्णाति। सा गृध्रसी वात-
तयात कफोरदुत्पने इत्यनेनोक्ते तद्द्वे अपि विवृत्ते भवतः। अनुक्ते न खभेदादिप्रसिगहा थम-
हा स्वधानानामित्यादि शोषात नखभेदादीन नखगुल्मादीनामनुरूपैः लिंगै भेदः स्वेत्वा-
पादिभिर्निर्दिशेदिति ज्ञेयं। केचित् स्वधाननामानुरूपैरिति पठंति। तत्र नखभेदस्थान-
नुरूपसंज्ञानुरूपं च लिंग नखस्फुटनरूपं भवति ॥ तद्धि नखगततया स्वधानामन्वर्थ-
संज्ञो प्रतीयमानतया नामानुरूपं भवतिः। एवमपरवातविकारेष्वपि महानोगोक्ते

षु। स्थानानुपूर्वल्लिंगयोगोनुसर्तव्यः। वातस्य पित्तादिसंसर्गं ज्ञापयन्नाह। सर्वेष्विय
दि पित्ताद्यैरिति पित्तकफतत्तत्पुरीषादिभिः। अथावृतस्य वायोः कथं कुपितत्वं भवति
यतो आवृतो दुर्बल एव भवतीत्याह वायोरित्यादि। धातुक्षयादिति। सारक्षयात्। मार्गावि
रणेन च गतिप्रतिबंधादेव कुपितो भवति। अथ भवेत् मार्गरोधाद्वातकोपः। आवरके
षु पित्तेन कफेन चास्य कथं संबंधो भवतीत्याह वातपित्ते इत्यादि। त्रितयमलकेपि वायोः
प्राधान्यमाह। वायुरेव इत्यादि। सूक्ष्मत्वादिति सूक्ष्ममार्गानुसारित्वात् यापनकत्वात्। तस्मा
त्रिष्वपि दोषेषु वायुरेवोक्त्या येन प्रधानं। अतः कुपितः तौ पित्तकफौ समुद्धूतकोपं
लिंगमह दर्शयित्वा आवृतपाविशेषं तल्लिंगं पित्तावृत इत्यादिकथ्याय परायइति के दूष्या
दिकफ विपरीतैः उपशायः अधिकमिति पदेन वातहेतेनाप्युपशायो नाधिको भव

तीति दर्शयति। मांसग इति मांसादने मांसगस्य हिनक्त्यादि गतस्य च वातस्य पूर्वमेव
लक्षणमुक्तं। इह तु रक्ताद्यावृतस्य लक्षणमुच्यते। इति विशेषः। आढ्यवात इति। आयु
र्वेदिसंज्ञेयं मेदसा आवृतवातस्य स्वस्थान इति पक्वापनिरक्ततीति पथिकत्तिको। जन
पतिसाध्यासाध्यविभागमाह। गात्रशोष इत्यादि। अत्र कुचेत् प्रकुलादयो यद्यपि स
क्षानुप्रपंचिना। तथापि चशेषातिदर्शनेव तल्लक्षणमुक्तं ते यं खुडवाततागुल्मगत
वातनाडिवासंधिगतो वातः मज्जास्थिगा इति मज्जस्यावृतमज्जास्थिगतवातज
न्या इत्यर्थः स्थानस्य गांभीर्यादिति गंभीरस्थानाश्रितत्वात्। अन्ये तु गांभीर्यस्थि
तास्य तमाहुः। यन्नासिध्यंति वातनेति पाक्षिकसिद्धिवचनमितरवैद्यापि प्राये
णाज्ञेयं। आचार्यस्तु आचार्यप्रख्यो वा वैद्य साधयत्येव यत्नात् देहान्तरं तत्स्त
वैद्यो नावश्यं सर्वत्राव्याहतज्ञानो भवति तेन न तत्प्रतिसंज्ञाया विधानं तत्तत्तश्च

नपानमार्थिकी संदिग्धतो एतदृशानां साध्यतो प्रतीतिर्ज्ञेयेन चानामप्येषां निरुपद्र
वतया साध्यतामाह नचानित्यादि उपद्रवाश्चात्र श्रृंगग्राहिकयाअनुक्ताअपि सामा
न्योपद्रव लक्षणयुक्ता एव ये केचितृगदज्ञेयाः। किंवाअयं द्रोषेहृद्रोगो विद्रधिरित्यादि
नावश्यमापाउपद्रवाज्ञेयाउ एवसरप्रोमां क्रियामाह। क्रियामतइत्यादी केवलमिया
दो केवलमिति असंस्पृष्टवायुमित्यर्थः। निरुपष्टंभमियनार्रुतं केस्नेहैः कथंचोपचरेदि
त्याह सर्पिर्वसातैलमज्जापाने नेति स्नेहपानप्रयोगानंतरं कर्त्तव्यमाह। भिन्नंततःस्नेहकं
तमिति स्नेहपानात् द्विग्नं स्नेहग्लानं वा समाश्वास्येति विश्वासयित्वा स्नेहयेदिति पदं तत्
प्पिपिः पानैरित्यत्र यावदनुवर्त्तते। अन्यैरिति कुटीरप्रभिः स्वेदादिभिः। यथायोगमिति
सर्वथाहि स्नेहार्द्रं स्विन्नमित्यादि स्वेदाध्याये स्नेहपूर्वं प्रयुक्ते त्यादिना उक्तो प्ययं स्ने
हपूर्वकः स्वेदस्तु पोः प्रलः प्रकरणगतत्वादुच्यते। आशुयोगितइत्यत्राक्षिविति पदं

पुक्वातीयनेनसंबध्यते। अनिलामयानति रुतिनस्वापिनो भवेती त्यर्थः। यद्य
नेन सदोषत्वादित्यादि। अत्रकेवलो निरुपपयस्तंभच वायुश्चिकित्सनेनाधिस्ततः
सदोषत्वमनुपोपन्नं तततः सदोषत्वं कर्मणि योजयंति। तेनाकर्मण्य विशुद्धत्वान्नानुत्त
प्रशाम्यति। कर्मपार्श्वोचस्याप्यत्राशुद्धिर्मलजनकत्वात्। स्निग्धाम्लल वणोष्णा
द्यैः आहारैर्विमिलश्च तइत्यादि किंवा सदोषत्वइत्यनोत्तरकालीनं वायोः समलत्वमु
च्यते। असंसृष्टः मनुपस्तंभतेनच। यदुक्तं।। तदुपत्रमानंभकालेज्ञेयं सदोषत्वं से
हप्रयोगेपानुप्रभ्रास्ते संशोधनेकरणेच हेतुसमलत्वमेव तत्तत्कालीनं तुनोभ
वतीत्याह। स्निग्धाम्लेत्यादि दुर्बलो योगः। विरेच्यइति दुर्बलत्वप्रकर्षेणाविरे
रेच्यं इत्यर्थः। अत्यर्थं दुर्बलितया तत्रस्यन हे पिविधिमाह। पाचनीयै रूपनी

नरं

यैश्चेति। तथाध्यनास्वाप्याऽजीर्णादौ अतिदुर्बलैः पठितः। पाचनं किंचित्तदी
पनं। यथा पटोलं दीपनं किंचित्तन्न पाचनं। यथा त्रिफला। उक्तं हि सुश्रुते। त्रिफला क
फपित्तघ्नी मेहकुष्ठविनाशिनी। चक्षुष्या दीपनी चेति पाचनैरित्यस्य दीपनैरिति वि
शेषणं द्रष्टव्यं। भोज्यैर्वा निश्चितैरिति पाचनदीपनसंयुतैर्भोज्यैर्वा पाचयेत्। उच्चि
ते। अग्न्यादिवृद्धिदीपितेन कौष्ठवातस्थानविशेषेण क्रियाविशेषणमाह। विशेषण
स्विन्नादिना। अधो नाभेः शस्यते॥ नाचपीडकमिति पिंडेन। क्षारमिति यवक्षार
उक्तेडि। योगरसकः पाचनीयः स्रंसनीयो शोधनानां। किं वा क्षारमिति ग्रहण्यादि
निर्दिष्टं दीपनक्षारं। उदावर्तेन्नितकर्म्म त्रिमर्म्मीये तैलशीतज्वरनातु
नो मिसादिनोक्तं सेयं स्वेदाद्यादिनुग्रहणानिलचिकित्सितं ग्रहणीमिनोन्

षिणीं विरेचनानंतरं प्रतिभोजितो विरिक्तः प्रतिउक्तैः पूर्वोक्ताभिरिति वन्यः गुल्मजनह
विपीत्रियानथापनेति। पुष्टिजननुसितादिभिः सिद्धं पयो हितं। अंगुमात्रीशाल
पर्णीमस्या इति नाभिप्रदेशे कुपिते वाते मस्या बिल्वशालाटूनां समं सिद्धा देया नाभि
प्रदेशः कोपश्च वातस्यानुक्तोपीह तत्र स वंशलतादादिभिः सेया। वक्ष्यमाण इति अ
नमोद्यमानेऽपनाहने च वातहरैर्द्रव्यैर्विकर्त्तव्यं नस्ये पाने च उत्तरवस्तौ च माष
सैंधवसाधितमेव तैलमेव त्तये॥ तत्र च माषस्य क्वाथः सैंधवं कल्कः सर्पिः षोडवपी
डके यन्न सर्पिः पीत्वात तत्पीतवमनं भुज्यते। अदितादि चिकित्सामाह। अदित इ
त्यादि। तर्पणमित्यादि। वनविशेषणं किंवा तर्पणं संतर्पणमेव अंतनाकुंडगुल्म
शिने त्रिकंडायां गुल्पयोर्मध्ये शिराव्यधनं कर्त्तव्यं। अग्निकर्म्मात्ते तु वस्तिप्रदेशे
कुर्वीत गृध्रसीषु चिविलिवद्वक्रचनेत्यक्तिभेदत या व्यापादितास्य इति विवृतास्य

प्रदेशिनी अंगुष्ठानंतरांगुली अनुक्तविशेषविशेषोपग्रहार्थमाह। प्रत्येकमित्यादि स्वा
नं पकाशयादि दूष्यं रसरक्तादि आदिग्रहणात्। आवरणग्रहणं स्थानदूष्यापेक्षावत्क्रिया
विशेषसूत्रकारो ऽत्र इत्यादिनैवोक्ता सर्ववैस्तविकारसमाने चिकित्सितमाह। सर्पिस्तैल
मित्यादि। बलायाइत्यादौ पृथक्शब्दात् बलादयः त्रयः साधने द्रव्यप्रयोगाः तेष्वजग
न्धादयश्चत्वारः पृथगेव साध्या एवं द्वादशतस्य कोऽसवें यमीकल्पमिति प्रभाने पलानां तै
लयोनीनामिति। तिलानस्यादीनां प्रदेहानुपहोश्चेत्यत्र प्रदेह उपनाहापेक्षया। तन्नुक्षेप
गंधैर्विषसुगंधैः रूक्षसुध्येत्यादौ सुध्यानिलाहीः केवलवातपीडिता घृतमंडो घृतस्य
परिणमनो भागः। युक्तित एव पले प्रकुंचपलेन द्वत सिद्धेति बलाबिल्वश्रतक्षीर सि
द्धे वसानत्रेत्यादि ग्रंथं पूर्वेण्याख्यातमिति पठंति। रूक्षागंधामिति सोभांजन
कतच। महास्नेहमिति चतुःस्नेहं। तेनासिद्धं समं तैलमित्यत्र समम् इति नि

गुंडीरससमं न तु समशब्दः सहार्थः तुल्यार्थस्य तृतीयैवोक्तत्वात्। नाडी नाडीत्र
पाः नाडीत्रपं तु सुश्रुतादिषु पंचविधत्वमुक्तं ज्ञेयं। अविधीच हनू स्विन्नकक्षादि दे
शभवा सुश्रुता दिव्याकृता मूलकस्य रस इत्यादौ मूलकस्य रसः समक्षीरदधि अ
हं स्थाप्यं तस्याम्लस्येति मूलकरसादिगतस्य अम्लतां गतस्य अत्र च त्रिभिः
प्रस्थैरिति पठनात् मूलकस्य रसादीनां प्रत्येकं प्रस्थमानत्वे। उक्तं हि जलकपेन्द्य ह
मेकस्थे प्रस्थे विपचेत्॥ दधिमस्त्वेवरसपयसां इत्यादि पंचमूल्याः कषाये पो[illegible]
सादौ पंचमूलीकषायस्तथा पिप्पल्याः क्वाथितजलं च पृथग्गतं देयमिति केचिद्वदं
ति च पंचमूलीकषायपीवजलस्थलीयेन पिण्याकस्य रसमं त्रेद्यामः॥ पाठश्च
पंचमूलीकषाये पिण्याके बहुवार्षिकं पक्वीतस्य रसं पचेत्यादि पठ्यते। जन्तुक

ग॥

पोषिण्याके बहुवर्जी स्विन्नादिसलिले पचेद्रसः अस्मिन्नुष्णसपयसा तैलं साध्य
मिति द्रवैरम्लैरिति कांजिकतक्रादिभिः फलाम्लैरिति अम्लफलैर्दाडिमादिभि
रनुः प्रयोगापीति अत्र पानाभ्यंगनस्यानुवासमयोग्यमिति सहाचरैस्यादौ मूले
कल्कादशपलमिश्रेण नसं हचरमूलादेर्दशपलः कल्कोदेयः । जन्तुकेपेति त्रिमू
लकस्यैव कल्कः उत्तरं जीवेति तैल इत्यादिपीतैतैले जीवसिति क्षीरे पापेयो रास्न
या अष्टभागेनादित्रयोदशपलानि भवंति । साजपयोर्द्वाविमिति छागक्षीराद्द
दकयुक्तं सूपपिष्टयो मुद्गमाषपत्न्योर्नसोगंधनसः नलिका स्वनामख्याताक
टुफललता वस्तुरी अल्पे सुगंधि दक्षिणापथप्रसिद्धं । कुचलमाकुचं न्तु
रुष्कः सिद्धकः । नखी स्वल्पनखी पत्रकल्कमिति । सुगंधिसादृश्यादे

तस्य गंधशास्त्र परिभाषया पत्रकल्को ज्ञेयः । उच्यते गंधशास्त्रे चूर्ण
